# Shri KanchikAmakotipithasya Jagadguruparamparastavah

# શ્રીકાઞ્ચીકામકોટિપીઠસ્ય જગદ્ગુરુપરમ્પરાસ્તવઃ

## Document Information

Text title : Jagadguruparampara Stavah

File name : jagadguruparamparAstavaH.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Transliterated by : Aruna Narayanan

Proofread by : Aruna Narayanan

Latest update : April 12, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2024

*sanskritdocuments.org*

# શ્રીકાઞ્ચીકામકોટિપીઠસ્ય જગદ્ગુરુપરમ્પરાસ્તવઃ

(પઞ્ચષષ્ટિતમૈઃ પીઠાધિપતિભિઃ
શ્રીમત્સુદર્શનમહાદેવેન્દ્રસરસ્વતીશ્રીચરણૈઃ પ્રણીતઃ)

નારાયણં પદ્મભુવં વસિષ્ઠં
શક્તિં ચ તત્પુત્રપરાશરં ચ ।
વ્યાસં શુકં ગૌડપદં મહાન્તં
ગોવિન્દયોગીન્દ્રમથાસ્ય શિષ્યમ્ ॥ ૧॥

શ્રીશઙ્કરાચાર્યમથાસ્ય પદ્મ-
પાદં ચ હસ્તામલકં ચ શિષ્યમ્ ।
તં તોટકં વાર્તિકકારમન્યાન્
અસ્મદ્ગુરૂન્ સન્તતમાનતોઽસ્મિ ॥ ૨॥

સદાશિવસમારમ્ભાં શઙ્કરાચાર્યમધ્યમામ્ ।
અસ્મદાચાર્યપર્યન્તાં વન્દે ગુરુપરમ્પરામ્ ॥ ૩॥

સર્વતન્ત્રસ્વતન્ત્રાય સદાઽઽત્માદ્વૈતવેદિને ।
શ્રીમતે શઙ્કરાચાર્ય વેદાન્તગુરવે નમઃ ॥ ૪॥

અવિપ્લુતબ્રહ્મચર્યાન્ અન્વિતેન્દ્રસરસ્વતીન્ ।
આત્તમિત્યાવારપદાન્ અદ્વૈતાચાર્યસઙ્ઘાન્ ॥ ૫॥

આસેતુહિમવચ્છૈલં સદાચારપ્રવર્તકાન્ ।
જગદ્ગુરૂન્ સ્તુમઃ કાઞ્ચીશારદામઠસંશ્રયાન્ ॥ ૬॥

પવિત્રિતેતરાદ્વૈતમઠપીઠીશિરોભુવે ।
શ્રીકાઞ્ચીશારદાપીઠગુરવે ભવભીરવે ॥ ૭॥

વાર્તિકાદિબ્રહ્મવિદ્યાકર્ત્રે બ્રહ્માવતારિણે ।
સુરેશ્વરાચાર્યનામ્ને યોગીન્દ્રાય નમો નમઃ ॥ ૮॥

અપોઽશ્નન્નેવ જૈનાન્ ય આપ્રાગ્જ્યોતિષમાચ્છિનત્ ।

શિશુમાચાર્યવાગ્વેણીરચરોધિમહોબલમ્ ॥ ૯॥

સઙ્ક્ષેપશારીરમુખપ્રબન્ધવિવૃતાદ્વયમ્ ।
બ્રહ્મસ્વરૂપાર્યભાષ્યશાન્ત્યાચાર્યકપણ્ડિતમ્ ॥ ૧૦॥

સર્વજ્ઞચન્દ્રનામ્ના ચ સર્વતો ભુવિ વિશ્રુતમ્ ।
સર્વજ્ઞસદ્ગુરું વન્દે સર્વજ્ઞમિવ ભૂગતમ્ ॥ ૧૧॥

મેધાવિનં સત્યબોધં વ્યાધૂતવિમતોચ્ચયમ્ ।
પ્રાચ્યભાષ્યત્રયવ્યાખ્યાપ્રવીણં પ્રભુમાશ્રયે ॥ ૧૨॥

જ્ઞાનાનન્દમુનીન્દ્રાર્યં જ્ઞાનોત્તમપરાભિધમ્ ।
ચન્દ્રચૂડપદાસક્તં ચન્દ્રિકાકૃતમાશ્રયે ॥ ૧૩॥

શુદ્ધાનન્દમુનીન્દ્રાણાં વિદ્ધાર્હતમતત્વિષામ્ ।
આનન્દજ્ઞાનસેવ્યાનાં આલમ્બે ચરણામ્બુજમ્ ॥ ૧૪॥

સર્વશાઙ્કરભાષ્યૌઘભાષ્યકર્તારમદ્વયમ્ ।
સર્વવાર્તિકસદ્વૃત્તિકૃતં શ્રીશૈલગં ભજે ॥ ૧૫॥

કૈવલ્યાનન્દયોગીન્દ્રાન્ કેવલં રાજયોગિનઃ ।
કૈવલ્યમાત્રનિરતાન્ કલયેમ જગદ્ગુરૂન્ ॥ ૧૬॥

શ્રીકૃપાશઙ્કરાર્યાણાં મર્યાદાતીતતેજસામ્ ।
ષણ્મતાચાર્યકજુષાં અઙ્ઘ્રિદ્વન્દ્વમહંશ્રયે ॥ ૧૭॥

મહિષ્ઠાય નમસ્તસ્મૈ મહાદેવાય યોગિને ।
સુરેશ્વરાપરાખ્યાય ગુરવે દોષભીરવે ॥ ૧૮॥

સ્તુમઃ સદા શિવાનન્દચિદ્ઘનેન્દ્રસરસ્વતીન્ ।
કામાક્ષિચન્દ્રમૌલ્યર્ચાકલનૈકલસન્મતીન્ ॥ ૧૯॥

સાર્વભૌમાભિધમહાવ્રતચર્યાપરાયણાન્ ।
વન્દે જગદ્ગુરૂંશ્ચન્દ્રશેખરેન્દ્રસરસ્વતીન્ ॥ ૨૦॥

સમાદ્વાત્રિંશદત્યુગ્રકાષ્ઠમૌનસમાશ્રયાન્ ।
જિતમૃત્યૂન્ મહાલિઙ્ગભૂતાન્ સચ્ચિદ્ઘનાન્ નુમઃ ॥ ૨૧॥

મહાભૈરવદુસ્તન્ત્રદુર્દાન્તધ્વાન્તભાસ્કરાન્ ।
વિદ્યાઘનાન્ નમસ્યામિ સર્વવિદ્યાવિચક્ષણાન્ ॥ ૨૨॥

આચાર્યપદપાથોજપરિચર્યાપરાયણં
ગઙ્ગાધરં નમસ્યામઃ સદા ગઙ્ગાધરાર્ચકમ્ ॥ ૨૩॥

જગજ્જયિસુસૌરાષ્ટ્રજરદૃષ્ટિમદાપહાન્ ।
શકસિલ્હકદર્પઘ્નાન્ ઈડીમહિ મહાયતીન્ ॥ ૨૪॥

ચતુસ્સમુદ્રીક્રોડસ્થવર્ણાશ્રમવિચારકાન્ ।
શ્રિતવિપ્રવ્રજસ્કન્ધસુવર્ણાન્દોલિકાચરાન્ ॥ ૨૫॥

પ્રત્યહં બ્રહ્મસાહસ્રસન્તર્પણધૃતવ્રતાન્ ।
સદાશિવસમાહ્વાનાન્ સ્મરામઃ સદ્ગુરૂન્ સદા ॥ ૨૬॥

માયાલોકાયતીભૂતબૃહસ્પતિમદાપહાન્ ।
વન્દે સુરેન્દ્રવન્દ્યાઙ્ઘ્રીન્ શ્રીસુરેન્દ્રસરસ્વતીન્ ॥ ૨૭॥

શ્રીવિદ્યાકરુણાલબ્ધબ્રહ્મવિદ્યાહૃતામયાન્ ।
વન્દે વશંવદપ્રાણાન્ મુનીન્ વિદ્યાઘનાન્ મુહુઃ ॥ ૨૮॥

વિદ્યાઘનકૃપાલબ્ધસર્વવેદાન્તવિસ્તરમ્ ।
કૌતસ્કુતોત્પાતકેતું નિશ્શઙ્કં નૌમિ શઙ્કરમ્ ॥ ૨૯॥

ચન્દ્રચૂડપદધ્યાનપ્રાપ્તાનન્દમહોદધીન્ ।
યતીન્દ્રાંશ્ચન્દ્રચૂડેન્દ્રાન્ સ્મરામિ મનસા સદા ॥ ૩૦॥

નમામિ પરિપૂર્ણશ્રીબોધાન્ ગ્રાવાભિલાપકાન્ ।
યદીક્ષણાત્ પલાયન્ત પ્રાણિનામામયાધયઃ ॥ ૩૧॥

સચ્ચિત્સુખાન્ પ્રપદ્યેઽહં સુખં આપ્તગુહાસ્થિતીન્ ।
ચિત્સુખાચાર્યમીડેઽહં સત્સુખં કોઙ્ગુણાશ્રયમ્ ॥ ૩૨॥

ભજે શ્રીસચ્ચિદાનન્દઘનેન્દ્રાન્ રસસાધનાત્ ।
લિઙ્ગાત્મના પરિણતાન્ પ્રભાસે યોગસંશ્રિતે ॥ ૩૩॥

ભગવત્પાદપાદાબ્જાસક્તિનિર્ણિક્તમાનસાન્ ।
પ્રજ્ઞાઘનં ચિદ્વિલાસં મહાદેવં ચ મૈથિલમ્ ॥ ૩૪॥

પૂર્ણબોધં ચ બોધં ચ ભક્તિયોગપ્રવર્તકમ્ ।
બ્રહ્માનન્દઘનેન્દ્રં ચ નમામિ નિયતાત્મનઃ ॥ ૩૫॥

ચિદાનન્દઘનેન્દ્રાણાં લમ્બિકાયોગસેવિનામ્ ।
જીર્ણપર્ણાશિનાં પાદૌ પ્રપદ્યે મનસા સદા ॥ ૩૬॥

સચ્ચિદાનન્દનામાનં શિવાર્ચનપરાયણમ્ ।
ભાષાપઞ્ચદશીપ્રાજ્ઞં ભાવયામિ સદા મુદા ॥ ૩૭॥

ભૂપ્રદક્ષિણકર્મૈકસક્તં શ્રીચન્દ્રશેખરમ્ ।
ત્રાતદાવાગ્નિસન્દગ્ધકિશોરકમુપાસ્મહે ॥ ૩૮॥

ચિત્સુખેન્દ્રં સુખેનૈવ ક્રાન્તસહ્યગુહાગૃહમ્ ।
કામરૂપચરં નાનારૂપવન્તમુપાસ્મહે ॥ ૩૯॥

નિર્દોષસંયમધરાન્ ચિત્સુખાનન્દતાપસાન્ ।
વિદ્યાઘનેન્દ્રાન્ શ્રીવિદ્યાવશીકૃતજનાન્ સ્તુમઃ ॥ ૪૦॥

શઙ્કરેન્દ્રયતીન્દ્રાણાં પાદુકે બ્રહ્મસમ્ભૃતે ।
નમામિ શિરસા યાભ્યાં ત્રીન્ લોકાન્ વ્યચરન્મુનિઃ ॥ ૪૧॥

સચ્ચિદ્વિલાસયોગીન્દ્રં મહાદેવેન્દ્રમુજ્જ્વલમ્ ।
ગઙ્ગાધરેન્દ્રમપ્યેતાન્ નૌમિ વાદિશિરોમણીન્ ॥ ૪૨॥

બ્રહ્માનન્દઘનેન્દ્રાખ્યાંસ્તથાઽઽનન્દઘનાન્ અપિ ।
પૂર્ણબોધમહર્ષીંશ્ચ જ્ઞાનનિષ્ઠાનુપાસ્મહે ॥ ૪૩॥

વૃત્ત્યાઽઽજગર્યા શ્રીશૈલગુહાગૃહકૃતસ્થિતીન્ ।
શ્રીમત્પરશિવાભિખ્યાન્ સર્વાતીતાન્ શ્રયે સદા ॥ ૪૪॥

અન્યોન્યસદૃશાન્યોન્યૌ બોધશ્રીચન્દ્રશેખરૌ ।
પ્રણવોપાસનાસક્તમાનસૌ મનસા શ્રયે ॥ ૪૫॥

મુક્તિલિઙ્ગાર્ચનાનન્દવિસ્મૃતાશેષવૃત્તયે ।
ચિદમ્બરરહસ્યન્તર્લીનદેહાય યોગિને ॥ ૪૬॥

અદ્વૈતાનન્દસામ્રાજ્યવિદ્રુતાશેષપાપ્મને ।
અદ્વૈતાનન્દબોધાય નમો બ્રહ્મ સમીયુષે ॥ ૪૭॥

શ્રયે મહાદેવચન્દ્રશેખરેન્દ્રમહામુની ।
મહાવ્રતસમારબ્ધકોટિહોમાન્તગામિનૌ ॥ ૪૮॥

વિદ્યાતીર્થસમાહ્વાનાન્ શ્રીવિદ્યાનાથયોગિનઃ ।
વિદ્યયા શઙ્કરપ્રખ્યાન્ વિદ્યારણ્યગુરૂન્ ભજે ॥ ૪૯॥

સચ્ચિદ્ઘનેન્દ્રરાન્ અદ્વૈતબ્રહ્માનન્દમુનીનપિ ।

સાન્દ્રાનન્દયતીન્દ્રાંશ્ચ તથાપ્યદ્વૈતશેવધીન્ ॥ ૫૦॥

મહાદેવશિવાદ્વૈતસુખાનન્દયતીશ્વરૌ ।
મનસા ભાવયે નિત્યં મહાસંયમધારિણૌ ॥ ૫૧॥

વીક્ષણાત્ સર્વભૂતાનાં વિષવ્યાધિનિબર્હણમ્ ।
શિવયોગીશ્વરં સાક્ષાચ્ચિન્તયામિ સદા મુદા ॥ ૫૨॥

પ્રત્યગ્જ્યોતિઃ પ્રકાશેન્દ્રાન્ પ્રત્યગ્જ્યોતિરુપાસિનઃ ।
ન્યક્કૃતાશેષદુસ્તર્કકાર્કશ્યાન્ સતતં સ્તુમઃ ॥ ૫૩॥

શઙ્કરાનન્દયોગીન્દ્રપદપઙ્કજયોર્યુગમ્ ।
બુક્કભૂપશિરોરત્નં સ્મરામિ સતતં હૃદા ॥ ૫૪॥

શ્રીપૂર્ણાનન્દમૌનીન્દ્રં નેપાલનૃપદેશિકમ્ ।
અવ્યાહતસ્વસઞ્ચારં સંશ્રયામિ જગદ્ગુરુમ્ ॥ ૫૫॥

મહાદેવશ્ચ તચ્છિષ્યશ્ચન્દ્રશેખરયોગ્યપિ ।
સ્તાં મે હૃદિ સદા ધીરાવદ્વૈતમતદેશિકૌ ॥ ૫૬॥

પ્રવીરસેતુભૂપાલસેવિતાઙ્ઘ્રિસરોરુહાન્ ।
ભજે સદાશિવેન્દ્રશ્રીબોધેશ્વરગુરૂન્ સદા ॥ ૫૭॥

સદાશિવશ્રીબ્રહ્મેન્દ્રધૃતસ્વપદપાદુકાન્ ।
ધીરાન્ પરશિવેન્દ્રાર્યાન્ ધ્યાયામિ સતતં હૃદિ ॥ ૫૮॥

આત્મબોધયતીન્દ્રાણાં આશીતાચલચારિણામ્ ।
અન્યશ્રીશઙ્કરાચાર્યધીકૃતામઙ્ઘ્રિમાશ્રયે ॥ ૫૯॥

ભગવન્નામસામ્રાજ્યલક્ષ્મીસર્વસ્વવિગ્રહાન્ ।
શ્રીમદ્બોધેન્દ્રયોગીન્દ્રદેશિકેન્દ્રાનુપાસ્મહે ॥ ૬૦॥

અદ્વૈતાત્મપ્રકાશાય સર્વશાસ્ત્રાર્થવેદિને ।
વિધૂતસર્વભેદાય નમો વિશ્વાદિશાયિને ॥ ૬૧॥

આ સપ્તમાજ્જીર્ણપર્ણજલવાતારુણાંશુભિઃ ।
કૃતસ્વપ્રાણયાત્રાય મહાદેવાય સન્નદિઃ ॥ ૬૨॥

ચોલકેરલચેરૌડ્રપાણ્ડ્યકર્ણાટકોઙ્કણાન્ ।
મહારાષ્ટ્રાન્ધ્રસૌરાષ્ટ્રમગધાદીંશ્ચ ભૂભુજઃ ॥ ૬૩॥

શિષ્યાન્ આસેતુશીતાદ્રિ શાસતે પુણ્યકર્મણે ।
શ્રીચન્દ્રશેખરેન્દ્રાય જગતો ગુરવે નમઃ ॥ ૬૪॥

નિષ્પાપવૃત્તયે નિત્યનિર્ધૂતભવક્લૃપ્તયે ।
મહાદેવાય સતતં નમોઽસ્તુ નતરક્ષિણે ॥ ૬૫॥

શ્રીવિદ્યોપાસનાદાર્ઢ્યવશીકૃતચરાચરાન્ ।
શ્રીચન્દ્રશેખરેન્દ્રાર્યાન્ શઙ્કરપ્રતિમાન્ નુમઃ ॥ ૬૬॥

શ્રીકાઞ્ચીશારદાપીઠસંસ્થિતાનાં ઇમાં ક્રમાત્ ।
સ્તુતિં જગદ્ગુરૂણાં યઃ પઠેત્ સ સુખભાગ્ભવેત્ ॥ ૬૭॥

॥ પરિશિષ્ટં - ૧॥

(અત્ર ૧-૪ પદ્યાનિ પોલહગ્રામાભિજનૈઃ શ્રીરામશાસ્ત્રિભિઃ
પ્રકાશિતાનિ । ૫ પદ્યં નવષષ્ટિતમૈઃ પીઠાધિપતિભિઃ
શ્રીમજ્જયેન્દ્રસરસ્વતીશ્રીપાદૈઃ રચિતમ્ । ૬-૭ પદ્યે
શિમિલિગ્રામાભિજનૈઃ રાધાકૃષ્ણશાસ્ત્રિભિઃ વિરચિતે ।)
કલાનન્દપરબ્રહ્માનન્દાનુભવતુન્દિલાન્ ।
મહાદેવેન્દ્રયમિનઃ સતતં સંશ્રયે હૃદા ॥ ૬૮॥

પ્રતિદિનવિહિતશ્રીચન્દ્રમૌલીશ્વરાર્ચા-
પ્રસિતસકલદેહઃ પ્રૌઢપુણ્યાનુભાવઃ ।
મનસિ સતતમાસ્તાં શ્રીમહાદેવનામા
મમ ગુરુરિતકાઞ્ચીશારદાપીઠસીમા ॥ ૬૯॥

અતિબાલ્યવિધૃતસંયમવિમલમનઃસેવિતેશચરણયુગાન્ ।
શ્રીચન્દ્રશેખરેન્દ્રાન્ સામ્પ્રતમાચાર્યશેખરાન્ પ્રણુમઃ ॥ ૭૦॥

લક્ષ્મીનારાયણ ઇતિ પૂર્વાશ્રમનામભૂષિતં શાન્તમ્ ।
ઋગ્વેદે સમ્યગધીતિનં મહાદેવમાશ્રયામિ ગુરુમ્ ॥ ૭૧॥

અપારકરુણાસિન્ધું જ્ઞાનદં શાન્તરૂપિણમ્ ।
શ્રીચન્દ્રશેખરગુરું પ્રણમામિ મુદાઽન્વહમ્ ॥ ૭૨॥

પરિત્યજ્ય મૌનં વટાધઃ સ્થિતિં ચ
વ્રજન્ ભારતસ્ય પ્રદેશાત્ પ્રદેશમ્ ।
મધુસ્યન્દિવાચા જનાન્ ધર્મમાર્ગે
નયન્ શ્રીજયેન્દ્રો ગુરુર્ભાતિ ચિત્તે ॥ ૭૩॥

નમામઃ શઙ્કરાન્વાક્યવિજયેન્દ્રસરસ્વતીમ્ ।
શ્રીગુરું શિષ્ટમાર્ગાનુનેતારં સન્મતિપ્રદમ્ ॥ ૭૪॥

ઇતિ શ્રીકાઞ્ચીકામકોટિપીઠ જગદ્ગુરુપરમ્પરાસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Aruna Narayanan

*Shri KanchikAmakotipithasya Jagadguruparamparastavah*

pdf was typeset on April 12, 2024

Please send corrections to *sanskrit@cheerful.com*